# ॥ रामोपदेशः ॥

## श्री-महादेव उवाच

एकान्ते ध्याननिरते एकदा राघवे सति।
ज्ञात्वा नारायणं साक्षात्कौसल्या प्रियवादिनी॥ ५३ ॥

भक्त्याऽऽगत्य प्रसन्नं तं प्रणता प्राह हृष्टधीः।
राम त्वं जगतामादिरादिमध्यान्तवर्जितः॥ ५४ ॥

परमात्मा परानन्दः पूर्णः पुरुष ईश्वरः।
जातोऽसि मे गर्भगृहे मम पुण्यातिरेकतः॥ ५५ ॥

अवसाने ममाप्यद्य समयोऽभूद्‌ रघूत्तम।
नाद्याप्यबोधजः कृत्स्नो भवबन्धो निवर्तते॥ ५६ ॥

इदानीमपि मे ज्ञानं भवबन्धनिवर्तकम्।
यथा सङ्क्षेपतो भूयात्तथा बोधय मां विभो॥ ५७ ॥

निर्वेदवादिनीमेवं मातरं मातृवत्सलः।
दयालुः प्राह धर्मात्मा जराजर्जरितां शुभाम्॥ ५८ ॥

मार्गास्त्रयो मया प्रोक्ताः पुरा मोक्षाप्तिसाधकाः।
कर्मयोगो ज्ञानयोगो भक्तियोगश्च शाश्वतः॥ ५९ ॥

भक्तिर्विभिद्यते मातस्त्रिविधा गुणभेदतः।
स्वभावो यस्य यस्तेन तस्य भक्तिर्विभिद्यते॥ ६० ॥

यस्तु हिंसां समुद्दिश्य दम्भं मात्सर्यमेव वा।
भेदद्दष्टिश्च संरम्भी भक्तो मे तामसः स्मृतः॥ ६१ ॥

फलाभिसन्धिर्भोगार्थी धनकामो यशस्तथा।
अर्चादौ भेदबुद्ध्या मां पूजयेत् स तु राजसः॥ ६२ ॥

परस्मिन्नर्पितं यस्तु कर्मनिर्हरणाय वा।
कर्तव्यमिति वा कुर्याद्भेदबुद्ध्या स सात्त्विकः॥ ६३ ॥

मद्गुणाश्रयणादेव मय्यनन्तगुणालये।
अविच्छिन्ना मनोवृत्तिर्यथा गङ्गाम्बुनोऽम्बुधौ॥ ६४ ॥

तदेव भक्तियोगस्य लक्षणं निर्गुणस्य हि।
अहैतुक्यव्यवहिता या भक्तिर्मयि जायते॥ ६५ ॥

सा मे सालोक्यसामीप्यसार्ष्टिसायुज्यमेव वा।
ददात्यपि न गृह्णन्ति भक्ता मत्सेवनं विना॥ ६६॥

स एवात्यन्तिको योगो भक्तिमार्गस्य भामिनि।
मद्भावं प्राप्नुयात्तेन अतिक्रम्य गुणत्रयम्॥ ६७॥

महता कामहीनेन स्वधर्माचरणेन च।
कर्मयोगेन शस्तेन वर्जितेन विहिंसनात्॥ ६८॥

मद्दर्शनस्तुतिमहापूजाभिः स्मृतिवन्दनैः।
भूतेषु मद्भावनया सङ्गेनासत्यवर्जनैः॥ ६९॥

बहुमानेन महतां दुःखिनामनुकम्पया।
स्वसमानेषु मैत्र्या च यमादीनां निषेवया॥ ७०॥

वेदान्तवाक्यश्रवणान्मम नामानुकीर्तनात्।
सत्सङ्गेनार्जवेनैव ह्यहमः परिवर्जनात्॥ ७१॥

काङ्क्षया मम धर्मस्य परिशुद्धान्तरो जनः।
मद्गुणश्रवणादेव याति मामञ्जसा जनः॥ ७२॥

यथा वायुवशाद्गन्धः स्वाश्रयाद्घ्राणमाविशेत्।
योगाभ्यासरतं चित्तमेवमात्मानमाविशेत्॥ ७३॥

सर्वेषु प्राणिजातेषु ह्यहमात्मा व्यवस्थितः।
तमज्ञात्वा विमूढात्मा कुरुते केवलं बहिः॥ ७४॥

क्रियोत्पन्नैर्नैकभेदैर्द्रव्यैर्मे नाम्ब तोषणम्।
भूतावमानिनार्चायामर्चितोऽहं न पूजितः॥ ७५॥

तावन्मामर्चयेद् देवं प्रतिमादौ स्वकर्मभिः।
यावत् सर्वेषु भूतेषु स्थितं चात्मनि न स्मरेत्॥ ७६॥

यस्तु भेदं प्रकुरुते स्वात्मनश्च परस्य च।
भिन्नदृष्टेर्भयं मृत्युस्तस्य कुर्यान्न संशयः॥ ७७॥

मामतः सर्वभूतेषु परिच्छिन्नेषु संस्थितम्।
एकं ज्ञानेन मानेन मैत्र्या चार्चेदभिन्नधीः॥ ७८॥

चेतसैवानिशं सर्वभूतानि प्रणमेत् सुधीः।
ज्ञात्वा मां चेतनं शुद्धं जीवरूपेण संस्थितम्॥ ७९॥

तस्मात्कदाचिन्नेक्षेत भेदमीश्वरजीवयोः।
भक्तियोगो ज्ञानयोगो मया मातरुदीरितः॥ ८०॥

आलम्ब्यैकतरं वाऽपि पुरुषः शुभमृच्छति।
ततो मां भक्तियोगेन मातः सर्वहृदि स्थितम्॥ ८१॥

पुत्ररूपेण वा नित्यं स्मृत्वा शान्तिमवाप्स्यसि।
श्रुत्वा रामस्य वचनं कौसल्याऽऽनन्दसंयुता॥ ८२॥

रामं सदा हृदि ध्यात्वा छित्त्वा संसारबन्धनम्।
अतिक्रम्य गतीस्तिस्रोऽप्यवाप परमां गतिम्॥ ८३॥

कैकेयी चापि योगं रघुपतिगदितं पूर्वमेवाधिगम्य
श्रद्धाभक्तिप्रशान्ता हृदि रघुतिलकं भावयन्ती गतासुः।
गत्वा स्वर्गं स्फुरन्ती दशरथसहिता मोदमानावतस्थे
माता श्रीलक्ष्मणस्याप्यतिविमलमतिः प्राप भर्तुः समीपम्॥ ८४॥

॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे उत्तरकाण्डे सप्तमः सर्गः सम्पूर्णः॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Ramopadesha-_Uttara_Kanda.

generated on **May 9, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits